**दिनाङ्क :- 22.06.2025**

**प्रात: - 06:55**

**<u>अथ वार्ताः</u>**

**<u>बिहारप्रशासनेन सहायता राशि</u>**

वृद्धेभ्य: दिव्यांगजनेभ्य: दीयमानं द्रव्यात्मकं उत वार्धक्यसहायताराशि: सप्तशतं रूप्यकेभ्य: वर्धितम्। मुख्यमन्त्री नीतिश कुमार: अवोचत् यत् अग्रिममासात् आरभ्य एतेभ्य: लाभार्थिभ्य: प्रति मासं शताधिकैकसहस्त्रं यावत् रूप्यकाणि लप्स्यन्ते।

**<u>केन्द्रीय-गृह-मन्त्री अमितशाहः</u>**

केन्द्रीय-गृह-मन्त्री अमितशाहः अब्रवीत् यत् भारतं पाकिस्तानेन सह सिन्धु-जल-सन्धिं कदापि न पुनः स्थापयिष्यति इति। सः अवदत् यत्, पाकिस्तानं प्रति समधिकं जलं यद् वहति तत् जलं वलयितुं राजस्थाने कुल्याया: विनिर्माणं भविष्यति । एकस्मिन् वार्तापत्रस्य साक्षात्कारे गृहमन्त्री अवदत् यत्, भयोत्पादनस्य विरुद्धं प्रशासनस्य शून्य-सहिष्णुतायाः नीतिः अक्षुण्णः अस्ति इति।

**<u>डीजीसीए-एयर इंडिया</u>**

नागरिक-विमानपत्तन-महानिदेशालयः एयर्-इण्डिया इति संस्थायै निर्देशं दत्तवान् यत् गभीरतया नियमोल्लङ्घमुद्दिश्य त्रयः अधिकारिणः तत्क्षणप्रभावेन निष्कासयन्त्विति। आन्तरिक-अनुशासनात्मक-कार्याचरणाय च निर्देशं दत्तवान्; सहैव हि परिणामानां प्रस्तुतिः दशदिनेषु निवेदयत्विति निर्देशं दत्तवान्।

**<u>आ□रेशन □सिन्धु-एस□एल□वै. ने□ालः</u>**

क्षेत्रीय-ऐक्यस्य महत्त्वपूर्णेन भावेन, ईरान्-देशे विलम्बितान् नेपाल-श्रीलङ्का-देशयोः नागरिकान् प्रत्यावर्तने समावेशयितुं आपरेशन्-सिन्धु इत्यस्यान्तर्गतं भारतं स्वस्य निर्वासनप्रयासान् प्रावर्तयत्। एक्स इत्यत्र प्रदत्ते संदेशे उक्तमस्ति यत् नेपाल-श्रीलङ्का-सर्वकारयोः औपचारिक-अनुरोधानुगुणं एतत् कार्यम् अभवदिति। अवधेयास्पदं वर्तते यत् इरान्-देशात् आपरेशन्-सिन्धु-द्वारा स्वनागरिकाणां साहाय्यार्थं नेपाल-श्रीलङ्का-देशौ भारतं प्रति कृतज्ञतां प्रकटितवन्तौ। नेपालस्य विदेशमन्त्री आर्जु राणा देउबा, नेपालीछात्राणां निष्कासनस्य साहाय्यार्थं डा. एस्. जयशङ्कराय धन्यवादं ज्ञापितवती । एम्. एस्. देउबा अवदत् यत् भारतस्य समर्थनं नेपाल-भारत-सम्बन्धस्य सुदृढ: प्रतिबिम्बः अस्ति इति।

**भारत-ऋतुविज्ञान**

भारतीय-ऋतुविज्ञान -विभागेन अग्रिमेषु दिनेषु पञ्जाब्- हरियाणा, राजस्थानस्य च नैकषु भागेषु च वृष्टेः पूर्वानुमानं कृतम् । आकाशवाण्या सह वार्तालापं कुर्वन् भारत-ऋतुविज्ञान -विभागस्य वरिष्ठः वैज्ञानिकः आर्. के. जेनामणिः अवदत् यत् आगामिषु दिनेषु देहलीं समेत्य अन्येषु क्षेत्रेषु वृष्टिकालः आयास्यति इति।

**2100- आई.एम.डी. - जैनामनी**

भारतीय-ऋतुविज्ञान -विभागेन मध्यप्रदेश, कोडकण, गोवा, मध्य महाराष्ट्र, गुजरात , पूर्वीय-राजस्थान, दक्षिण हरियाणा, पंजाब, उत्तर प्रदेश, हिमाचल प्रदेश, उत्तराखंड , बंगाल, सिक्किम इत्येतेषु राज्येषु अति वृष्टेः अनुमानं कृतम्।

**डोणाल्ड् ट्रम्प् -ईरान**

अमेरिकादेशस्य राष्ट्रपतिः डोणाल्ड् ट्रम्पः अवदत् यत् इरान्-देशस्य फ़ोर्डो-स्थलं समेत्य त्रिषु परमाणु-स्थलेषु, अत्यन्तं स लं आक्रमणं कृतम् । एकस्मिन् सोशल मीडिया पोस्ट इत्यस्य माध्यमेन सः अवदत् यत् अमेरिका-देशः फ़ोर्डो, नातान्ज़्, इस्फ़हान् इत्येतेषु स्थलेषु इरानस्य परमाणु-सुविधासु आक्रमणं कृतवान्, अधुना सर्वाणि विमानयानानि इरानस्य वायुप्रदेशात् बहिः सन्ति इति। तस्य घोषणा दर्शयति यत् संयुक्तराज्यामेरिका आधिकारिकरूपेण इस्रेल्-देशेन सह इरान्-देशस्य उपरि आक्रमणे सम्मिलितः अस्ति ।

**ब्राज़ीलदेशीय दुर्घटना**

ब्राज़ीलदेशे, सांता कैटरीना राज्यस्य दक्षिणे प्राइया ग्रांडे नगरे वायुयानदुर्घटनायां गत रात्रौ न्यूनातिन्यूनम् अष्टजनाः मृत्युमुपगताः । राज्यपालः जोर्गिन्हो मेल्लो अवोचत् यत् एकविंशतिः जनाः याने आसन्, तेषु त्रयोदश जनाः व्रणिताः ।

**संस्कृत-साप्ताहिकी**

प्रियाः श्रोतारः, संस्कृत-जगता सम्बद्धैः विभिन्नैः क्रिया-कलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः ए .एम्.गोल्ड्-प्रवाहिकातः अद्य मध्याह्ने सार्धैक-वादनतः भविष्यति। भवन्तः सर्वे यथाकालं श्रोतुं प्रभवन्ति।

**।। इति वार्ताः।।**